# Shri Kartaviryarjuna MalamantraH

# શ્રી કાર્તવીર્યાર્જુન માલામન્ત્રઃ

## Document Information

Text title : Kartaviryarjuna Malamantrah

File name : kArtavIryArjunamAlAmantraH.itx

Category : deities_misc, mAlAmantra

Location : doc_deities_misc

Transliterated by : NA

Proofread by : NA

Latest update : March 2, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 22, 2023

*sanskritdocuments.org*

# શ્રી કાર્તવીર્યાર્જુન માલામન્ત્રઃ

શ્રી સરસ્વત્યૈ નમઃ । શ્રીગણેશાય નમઃ ।
ૐ અસ્ય શ્રીકાર્તવીર્યાર્જુનમાલામન્ત્રસ્ય દત્તાત્રેયો ભગવાન્ ઋષિઃ,
ગાયત્રી છન્દઃ, શ્રીકાર્તવીર્યાર્જુનો દેવતા, કૃતવીર્યો બીજમ્,
સહસ્રબાહુઃ શક્તિઃ, અવ્યાહતઃ કીલકમ્,
કાર્તવીર્યાર્જુનપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ।
ઋષ્યાદિ ન્યાસઃ -
શ્રીદત્તાત્રેય ઋષયે નમઃ શિરસિ । ગાયત્રી છન્દસે નમઃ મુખે ।
શ્રીકાર્તવીર્યાર્જુનદેવતાયૈ નમઃ હૃદિ । અભીષ્ટસિદ્ધ્યર્થે જપે વિનિયોગાય નમઃ સર્વાઙ્ગે ।
પઞ્ચાઙ્ગ ન્યાસઃ -
શ્રીદત્તાત્રેયપ્રિયતમાય હૃદયાય નમઃ । મહિષ્મતીનાથાય શિરસે સ્વાહા ।
રેવાનદીજલક્રીડાતૃપ્તાય શિખાયૈ વષટ્ । હૈહયાધિપતયે કવચાય હું ।
સહસ્રબાહવે અસ્ત્રાય ફટ્ ।

અથ ધ્યાનમ્ -
દોર્દણ્ડેષુ સહસ્રસમ્મિતતરેષ્વેતેષ્વજસ્રંલસત્-
ત્કોદણ્ડૈશ્ચ શરૈરુદગ્રનિશિતૈરુદ્યદ્દિવસ્વત્પ્રભઃ ।
બ્રહ્માણ્ડં પરિપૂરયન્તમખિલં ગણ્ડદ્વયાન્દોલિત
દ્યોતત્કુણ્ડલમણ્ડિતો વિજયતે શ્રીકાર્તવીર્યો વિભુઃ ॥

(ઉદગ્રબાણાઁશ્ચાપાનિ દધતં સૂર્યસન્નિભં
પ્રપૂરયન્તં બ્રહ્માણ્ડં ધનુર્જ્યાનિઃસ્વનૈસ્તથા ।
કાર્તવીર્યં નૃપં ધ્યાયેદ્ગણ્ડશોભિતકુણ્ડલં
એવં ધ્યાત્વા સમભ્યર્ચ્ય સર્વકર્માણિ સાધયેત્ ॥)

અથ માલામન્ત્રઃ -
ૐ નમો ભગવતે કાર્તવીર્યાર્જુનાય હૈહયાધિપતયે
સહસ્રકવચાય સહસ્રકરસદૃશાય (સહસ્રકરરધરાય)

સર્વદુષ્ટાન્તકાય સર્વશિષ્ટેષ્ટાય ।
સર્વત્ર ઉદધેરાગન્તુકામાનસ્મદ્વસ્તુવિલુપકાન્ ।
ચોરસમૂહાન્ સ્વકરસહસ્રૈઃ નિવારય નિવારય ।
ઉજ્જ્વલસહસ્રૈઃ બન્ધય બન્ધય
અઙ્કુશસહસ્રૈરાકર્ષય આકર્ષય
સ્વચાપોદ્ધતૈર્બાણસહસ્રૈઃ ભિન્ધિ ભિન્ધિ
સ્વહસ્તોદ્ધતખટ્વાઙ્ગસહસ્રૈશ્છિન્દિ છિન્દિ
સ્વહસ્તોદ્ધતમુસલસહસ્રૈર્મર્દય મર્દય
સ્વશઙ્ખોદ્ધતનાદસહસ્રૈર્ભીષય ભીષય
સ્વહસ્તોદ્ધતચક્રસહસ્રૈઃ ચૂર્ણય ચૂર્ણય (નિકૃન્તય નિકૃન્તય)
પરકૃત્યાં ત્રાસય ત્રાસય ગર્જય ગર્જય આકર્ષય આકર્ષય
ભ્રામય ભ્રામય મોહય મોહય મારય મારય ઉદ્વાસય ઉદ્વાસય
ઉન્માદયોન્માદય તાપય તાપય વિનાશાય વિનાશાય
તાપય વિદારય તાપય વિદારય
સ્તમ્ભય સ્તમ્ભય જૃમ્ભય જૃમ્ભય વારય વારય
વશીકુરુ વશીકુરુ ઉચ્ચાટયોચ્ચાટય વિનાશય વિનાશય
શ્રીદત્તાત્રેય શ્રીપાદપ્રિયતમ કાર્તવીર્યાર્જુન
સર્વત્રોદધેરાગન્તુકામાનસ્મદ્વસ્તુવિલુમ્પકાન્
સમુન્મૂલયોન્મૂલય હું ફટ્ સ્વાહા ॥

અનેન મન્ત્રરાજેન સર્વકામાંશ્ચ સાધયેત્ ।
માલામન્ત્રજપાચ્ચોરાન્ મારીંશ્ચૈવ વિશેષતઃ ।
ક્ષપયેત્ક્ષોભયેચ્ચૈવોચ્ચાટયેન્મારયેત્તથા ।
વશયેત્તત્ક્ષણાદેવ ત્રૈલોક્યમપિ મન્ત્રવિત્ ॥

ઇતિ શ્રીકાર્તવીર્યાર્જુનમાલામન્ત્રઃ સમ્પૂર્ણઃ ।

*Shri Kartaviryarjuna MalamantraH*

pdf was typeset on April 22, 2023

Please send corrections to *sanskrit@cheerful.com*